# 2019

## Part–III

## SANSKRIT

## (Honours)

### PAPER—VIII

*Full Marks* : 90

*Time* : 4 Hours

*The figures in the right-hand margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

*Illustrate the answer wherever necessary.*

*सर्वे प्रश्नाः समाधेयाः*

**1.** यथेच्छं *प्रश्नद्वयं* समाधेयम्— 2×10

(क) सामान्यलक्षणं प्रतिपदव्यावृत्तिप्रदर्शनपुरःसरं लिख्यताम्। किं नाम परसामान्यम् ?

*(Turn Over)*

(ख) अत्यन्ताभावस्य किं लक्षणम् ? तस्य नित्यत्वम्—नित्यत्वं वा? विशदमालोचनीयम्।

(ग) आकाशस्वरूपमुपवर्णनीयम्। आकाशे किमपि सामान्यं वर्तते न वेत्यपि लेखनीयम्।

(घ) हेत्वाभासशब्दस्य कोऽर्थः ? असिद्धस्य भेदाः सोदाहरणमालोचनीयाः।

**2.** यथेच्छं *द्वितय* संस्कृतेन व्याख्येयम्, उत्तरं च देवनागर्या लेखनीयम्—

2×5

(क) सुखाद्युपलब्धिसाधनमिन्द्रियं मनः।

(ख) संयोनाशको गुणो विभागः। सर्वद्रव्यवृत्तिः।

(ग) साहचर्यनियमो व्याप्तिः।

(घ) संज्ञासंज्ञिसंबन्धज्ञानमुपमितिः।

**3.** *यथेच्छमेकस्य* टीका लेख्या— 5

(क) स्मृतिः।

(ख) निमित्तकारणम्।

(ग) समवेतसमवायसन्निकर्षः।

(घ) चलनात्मकं कर्म।

**4.** यथेच्छं *पञ्चानां* प्रश्नानामुत्तरं संस्कृतेन देयम्, उत्तरं च देवनागर्या लेख्यम्—

1×5

(क) गन्धग्राहकमिन्द्रियं किम् ?

(ख) कस्य व्यवहारस्य हेतुः कालः ?

(ग) नैमित्तिकं द्रवत्वं कुत्र वर्तते।

(घ) प्रमाया एकमुदाहरणं दीयताम्।

(ङ) अभावप्रत्यक्षे कः सन्निकर्षः ?

(च) आप्तो नाम कः ?

(छ) का नाम योग्यता ?

**5.** यथेच्छमेकः प्रश्नः समाधेयः— 1×10

(क) बृहदारण्यकोपनिषदो नामकरणे किं बीजम् ? तस्या महत्त्वं प्रतिपादनीयम्।

(ख) उपनिषत्सु प्रतिपादितस्य मूलतत्त्वस्य परिचयः प्रदेयः।

**6.** यथेच्छमेकं संस्कृतेन व्याख्याय देवनागर्या उत्तरं लेखनीयम्— 5

(क) सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान् वेद तदेव मे ब्रूहीति।

(ख) स यथा वीपायै वाद्यमानायै न शब्दान् बाहयान् शक्नुयाद् ग्रहणाय वीणायै तु ग्रहणैन वीणावादस्य वा शब्दो गृहीतः।

**7.** यथेच्छमेकः प्रश्नः समाधेयः — 10

(क) ज्ञानयोगमाधारीकृत्य समाप्ततः कर्मतत्त्वं प्रतिपादनीयम्।

(ख) ज्ञानयोग इति समाख्यायास्तात्पर्यं व्याख्याय ज्ञानस्य महत्त्वमुपवर्णनीयम्।

**8.** यथेच्छमेकस्य प्रश्नस्योत्तरं दीयताम्— 1×10

(क) अद्वैतवादस्य परिचयः समासतः प्रदेयः।

(ख) वेदस्य प्रामाण्यं कथं प्रतिपादनीयम् ? सयुक्तिकमालोचनीयम्।

(ग) योगाचारबौद्धसम्मतस्य विज्ञानवादस्य पक्षे युक्तयो विवेचनीयाः।

**9.** कमपि *एकं* विषयमाश्रित्य टीका लेख्या — 5

(क) तर्कः।

(ख) भूतचैतन्यवादः।

(ग) प्रामाण्यवादः।

**10.** अधोलिखितेषु *दशानां* प्रश्नानामुत्तराणि संस्कृतेन देवनागर्या च लेख्यानि — 10×1

(क) वेदकर्तारो भण्डा इति केषां मतम् ?

(ख) द्वयोरास्तिकदर्शनयोर्नामनी लिखत।

(ग) कानि तावच् चत्वारि आर्यसत्यानि ?

(घ) सौत्रान्तिकबौद्धमते जगत् सत्यमसत्यं वा ?

(ङ) शून्यवादस्य प्रधानः प्रवक्ता कः ?

(च) न्यायमते परार्थानुमाने कति अवयवाः ?

(छ) न्यायमते आत्मन एकत्वमनेकतं वा ?

(ज) तन्तुपटयोः सम्बन्धः संयोगः समवायो वा ?

(झ) वैशेषिक इति नामकरणे किं बीजम् ?

(ञ) सांख्यमते प्रमाणानि कानि ?

(ट) सांख्यसम्मता गुणाः के ?

(ठ) योगाङ्गानि कति ? द्वयोर्नामनी लिखत।

(ड) श्लोकवार्त्तिकस्य को रचयिता ?

(ढ) अर्थापत्तेः किमुदाहरणम् ?

(ण) श्रीमाष्यं कस्य ग्रन्थस्य व्याख्यानम्, केन वा विरचितम् ?

(त) अनिर्वचनीयख्यातिं के समर्थयन्ति ?

(थ) मोक्षविषये जिज्ञासा कथं जायते ?

(द) शङ्कराचार्यकृतस्य वेदान्तसूत्रभाष्यस्य नाम किम् ?

---